National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2023; 1(48): 175-177
© 2023 NJHSR
www.sanskritarticle.com

**टाशी नामगेल**
अतिथिसंकाय (सहायकाचार्यश्रेणी)
बौद्धदर्शन एवं पालिविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालय,
एकलव्यपरिसरः, अगरतला, त्रिपुरा

**Correspondence:**
**टाशी नामगेल**
अतिथिसंकाय (सहायकाचार्यश्रेणी)
बौद्धदर्शन एवं पालिविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालय,
एकलव्यपरिसरः, अगरतला, त्रिपुरा

# सौगतन्यायपरम्परायां प्रत्यक्षचतुष्टयम्

**टाशी नामगेल**

मिथ्याददृष्टिप्रहाणाय परानुग्रहाय सम्यग्ज्ञानावबोधाय च प्रमाणशास्त्रस्यात्यावश्यकमित्यत्र नास्ति सन्देहः। निर्वाणंसर्वज्ञताञ्चाप्रासुं प्रमाणविद्या-कुञ्चिकावदिति सुगतेनानेकशः उक्तमस्ति। तेन सन्दर्शित-सन्मार्गस्य लोककल्याणार्थं प्रचार-प्रसारयितुञ्च महदुत्साहो परिलक्ष्यते तदनुयायिषु नैयायिकेषु च। उतसाहस्यास्य कार्यरूपाय न्यायविद्याश्रयमन्तरेण नासीत् कोप्यन्योपायः। तस्माद् भगवतो बुद्धस्य महापरिवनिर्वाणान्तरं तद्वचनानां प्रथमव्याख्याकारेण माध्यमिकदर्शन-प्रवर्तकेनाचार्यनागार्जुनेन वैदल्यसूत्रे पूर्वाचार्यैः प्रतिपादितानां प्रमाणादिषोडशपदार्थानां समालोचनापूर्वकं सर्वधर्मनिः स्वभाववादस्य शून्यवादस्य वा सिद्धान्तं संस्थाप्य दार्शनिके जगत्यभिनवा क्रान्तिरानीता। तस्यान्तेवासिना आचार्यार्यदेवेन चतुःशतककारेण च स्वतन्त्रबौद्धप्रमाणविद्यायाः निमित्तं बलं प्रदत्तम्। योगाचारेष्वन्यतमाचार्येण वसुबन्धुनापि प्रमाणविद्यामधिकृत्य ग्रन्थरचना कृता। तस्यानन्यतमशिष्येण सुविख्यातेनाचार्यदिङ्नागेन प्रमाणसमुच्चयाद्यनेकान् ग्रन्थान् विरच्य अक्षपादप्रणीतस्य न्यायसूत्रस्य, न्यायभाष्यकारष्य वात्स्यायनस्य प्रशस्तपादस्य च मतानि सयुक्ति समालोचितानि, अथ बौद्धन्यायशास्त्रस्य प्रस्थानं प्रवर्तितम्। विदितमेवैतद्यद्बौद्धदर्शनं नास्ति किमप्येकं दर्शनम्, अपितु दर्शनानां समूह इति। यदा बौद्धन्यायस्योल्लेखः क्रियते, तदा सौत्रान्तिकदर्शनानुसारं प्रचलित-बौद्धन्यायस्य चर्चैव तत्रावलोक्यते। किन्तु बौद्धन्यायस्य विविधायामाःविद्यन्ते इत्यत्र ज्ञातव्यम्।

प्रमाणकसमुच्चयस्य प्रभावतया भारतीयचिन्तनधारायां किमप्यभिनवं परिवर्तनमारब्धम्। तस्माद् दिङ्ननागो बौद्धन्यायस्य जनकरूपेण स्वीक्रियते विद्वद्भिः। तदनन्तरकालिकेनोद्योतकरेण आचार्यवसु-बन्धुदिङ्नागकृतदूषाणानाम् आचार्यनागार्जुनकृतप्रमाणप्रमेयादीनामाक्षेपाणां खण्डनार्थं वात्स्यायन-भाष्यस्य वार्तिकं विरचितम्। आचार्यधर्मकीर्तिविरचितप्रमाणवार्तिकादिप्रमाणविषयकसप्तग्रन्थैः आचार्यशान्तरक्षितविरचिततत्त्वसङ्ग्रहादिभिश्चोद्योत्करोद्भावितदूषणानां निरसनं दिङ्नागमतस्य च मण्डनं जातम्। तत्प्रतिसमाधानार्थमाचार्यवाचस्पतिमिश्रेण तात्पर्यटीका विरचिता। सा पुनः ज्ञानश्रीमित्ररत्नकीर्तिप्रभृतिभबौद्धनैयायिकैः परीक्षिता समालोचिता वा। एतैः समुत्थापितानां प्रश्नानां प्रत्युत्तरार्थमुदयनाचार्येण परिशुद्धिटीकादिग्रन्था विरचिताः। अनेन नैकशताब्दीपर्यन्तं बौद्धतदितरपरम्परासु विचाराणामादानप्रदानेन बहूनि प्रमाणशास्त्राणि संविकसितानि। विद्यामिसां प्रति सौगतानामेतादृक्समर्पणभाववशादेव प्रमाणपटवो हि बौद्धा इति जनश्रुतिः। अस्ति महद् रिक्थं सौगतनैयायिकानां भारतीयप्रमाणमीमांसाशास्त्राणां समुद्खभावने संविकासे समुपबृंहणे च।[1]

बौद्धन्यायस्य भारतीयन्यायशास्त्रे विशिष्टं स्थानां वर्तते। अस्य आत्मनः मौलिकी विशेषता वर्तते, महर्षिगौतमेन रचिते न्यायशास्त्रे यत्र चत्वारि प्रमाणानि स्वीकृतानि, तत्रैव बौद्धपरम्परायाः आचार्यैः द्विविधं प्रमाणमेव स्वीकृतम्। बौद्धपरम्परायाः विशेषता वर्तते यत् ते प्रमेयानां वस्तुसत्तां न स्वीकुर्वन्नपि प्रमाण-व्यवस्थापनं कुर्वन्ति। यतोहि प्रमाणव्यवस्था विशुद्धपेण ज्ञानक्षेत्रस्य व्यवस्था वर्तते। दिङ्नाग-धर्मकीर्ति इत्यादयः बौद्धनैयायिकाचार्याः यैः बाह्यार्थमस्वीकुर्वन्नपि एतादृशी प्रमाणव्यस्था कृता वर्तते येन बाह्यार्थवादिविद्वांसोऽपि सहर्षं मन्यन्ते।

**अस्त्येव विदुषां वादी बाह्यां त्वाश्रित्य वर्ण्यते।**

**द्वैरूप्यं सहसंवित्तिनियमात् तच्च सिद्ध्यति॥**[2]

बौद्धपरम्परायां सम्पूर्णव्यवस्था प्रमाणैः क्रियते तावत् पर्यन्तं यत् बुद्धस्य वचनान्यपि तर्केण परीक्षा करणीय भवति तथा च प्रमाणको भूते सति उपादेयता सिद्धेतव्या भवति।

**तापाच्छेदाच्च निकषात् सुवर्णमिव पण्डितैः।**

**परीक्ष्य भिक्षवो ग्राह्यं मद्वचो न तु गौरवात्॥**[3] ३५८७॥ तत्त्वसंग्रह

बौद्धपरम्परायां प्रत्यक्षं, अनुमाञ्च प्रमाणद्वयमेव स्वीकृतं तथा हि शब्दादीनि प्रमाणानि अनुमानप्रमाणे एव अन्तर्निहतानि भवन्ति। प्रमाणवार्तिकग्रन्थे प्रमाणलक्षणस्य प्रतिपादनम् एवं कृतम्। तद्यथा-

**प्रमाणमविसंवादिज्ञानमर्थक्रियास्थितिः।**

**अविसंवादनं शाब्देऽप्यभिप्रायनिवेदनात्॥**[4]

अर्थात्-अविसंवादि ज्ञानमेव प्रमाणं वर्तते, अर्थस्य क्रियायाः नाम एव अविसंवादः वर्तते शब्दज्ञानेऽपि वक्तुः अभिप्रेतार्थस्य निवेदनकारणात् प्रमाणता स्वीक्रियते।

अनुमानज्ञानं 'अविसंवादी' इति कारणात् प्रमाणं स्वीकृतम्, बाह्याविज्ञान- वासनावासित-विनयानाञ्च अपेक्षा ध्याने स्थापयन् अनुमानमपि प्रमाणं स्वीकृतम्, वस्तुतः स्वसंवेदनात्मकम् एकमात्रप्रमाणं प्रत्यक्षं वर्तते, अतः कश्चिदपि विरोधो उपस्थितो न भवति। वैदिकाद्वैतवादिविद्वांसोऽपि एतस्य तथ्यस्य दर्शनमकुर्वन्।

**यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि।**

**सा सैव प्रक्रियेह स्यात्साध्वीत्याचार्यभाषितम्॥**[5]

अनुमान हेतुः अवलोकनेन निश्चयं समुत्पन्नं कुर्वन् प्रवृत्तेः विषयं प्रदर्श्यते एवं रूपेण प्रत्यक्षप्रमाणं वस्तु नियतं सम्मुखञ्च प्रकाशमानरूपे दृश्यते परन्तु अनुमानं तम् नियतं, किन्तु हेतु सम्बद्धरूपे प्रदर्शयति द्वौ अपि नियत वस्तुनः प्रदर्शकौ स्तः। अत एव प्रत्यक्षम् अनुमानं च द्वै अपि प्रमाणे वर्तते।

प्रत्यक्षप्रमाणं प्रमाणवादिनः सर्वे दार्शनिकाः सांख्य-योग-न्याय-वैशेषिका-पूर्वमीमांसा-उत्तमीमांसा-वैभाषिक-सौत्रान्तिक-विज्ञानवाद -शून्यवाद-जैन-चार्वाकादयश्च तस्य स्वरूवस्य मतभेदादिभिः सह स्वीकुर्वन्ति। सांख्य-न्याय-वैशेषिकादीनि दर्शनानि ऐन्द्रियज्ञानं प्रत्यक्षप्रमाणश्रेण्यां स्थापितवन्तः परन्तु बौद्ध एवं जैनपरम्परायाम् ऐन्द्रिकमतीन्द्रियकञ्च द्विविधं प्रत्यक्षप्रमाणरूपे स्वीकृतवत्यौ, ते प्रमाणं ज्ञानात्मकं स्वीकुरुतः धर्मकीर्तिः प्रत्यक्षमतीन्द्रियकञ्च द्विविधं प्रत्यक्षप्रमाणरूपे स्वीकृतवत्यौ, ते प्रमाणं ज्ञानात्मकं स्वीकुरुतः धर्मकीर्तिः प्रत्यक्षाभासं भ्रान्तिम् उत्वद्यते भ्रान्तिं मनोजन्यो नैव स्वीकर्तुं शक्यते, इयं इन्द्रियविकारणात् समुत्पन्ना भवति।

तत् इदमपि प्रतिपादयति यत् सर्वतः चिन्तनं विकल्पान् च संकोचयन् शान्तचित्तयुक्तो पुरुषः चक्षुषा रूपम् अवलोकयति। अतः इदम् इन्द्रियजन्यं प्रत्यक्षज्ञानं वर्तते।

**संहृत्य सर्वतश्चिन्तां स्थितिमेनान्तरात्मना।**

**स्थितोऽपि चक्षुषा रूपमीक्षते सक्षजा मतिः॥**[6]

प्रत्यक्षस्य सिद्धये कस्यचित् अन्यस्य प्रमाणस्य आवश्यकता न वर्तते अपितु स्वसंवेदनरूपं प्रत्यक्षेण तत् सिद्ध्यते।

**प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति।**

**प्रत्यात्मवेद्यः सर्वेषां विकल्पो नाम संश्रयः॥**[7]

**प्रत्यक्षस्य भेदाः-**

**1. इन्द्रियज्ञानं प्रत्यक्षम्-**

**इन्द्रियस्य ज्ञानम् इन्द्रियज्ञानम्।**

**इन्द्रियाश्रितं यत् तत् प्रत्यक्षम्॥**[8]

इन्द्रियाश्रितविज्ञानमेव इन्द्रियज्ञानं कथ्यते। प्रत्यक्षज्ञाने इन्द्रियाणि असाधारण – कारणानि सन्ति, इन्द्रियज्ञानं प्रत्यक्षप्रमाणं वर्तते। चक्षु-श्रोत-त्वक्-रसना-घ्राणादीनि च इन्द्रियाणि नैव, यतोहि ज्ञानमेव अर्थस्य प्रापको वर्तते।

**इन्द्रियजन्यं ज्ञानमेव इन्द्रियज्ञानं वर्तते।– धर्मकीर्तिः**

नेत्रं पश्यति रूपाणि इत्यस्य निराकरणं कुर्वन् कथयति तद् ज्ञानस्य एव रूपस्य ज्ञाने सामर्थ्य वर्तते न तु इन्द्रियं नेत्रस्य। अतः ज्ञानमेव प्रमाणं वर्तते, नेत्रं न।

**धीः प्रमाणता। प्रवृत्तेस्तत्प्रधानवाद् हेयोपादेयवस्तुनि॥**[9]

**2. मनोविज्ञानं प्रत्यक्षम्-**

इन्द्रियविज्ञानस्य विषयानन्तरं क्षणवर्तिविषयेण सह इन्द्रियविज्ञानं रूपसमनन्तरेण जायामानज्ञानं मनोविज्ञानं वर्तते। एतद् मनसः प्रत्यक्षोऽपि कथ्यते।

**स्वविषयान्तरविषयसहकारिणेन्द्रिज्ञाने -**

**समनन्तरप्रत्ययेन जनितं तन्मनोविज्ञानम्।**[10]

इन्द्रियविज्ञानम् अनन्तरं क्षणोत्पन्नं मनोविज्ञानञ्च। द्वयोः विषयः एको नास्ति। क्षणभेदेन विषयभेदोऽपि भिन्नो वर्तते। मनोविज्ञानमिदं व्यापवारस्य उपरतभूते सत्येव इष्टं वर्तते। नेत्रादि इन्द्रियव्यापरेण सह इन्द्रियज्ञानमेव कथयिष्यते।

**3. स्वसंवेदनं प्रत्यक्षम्-**

**सर्वं चित्तचैत्तानामात्मसंवेदनम्।**[11]

चित्तम् अर्थमात्रस्य ग्राही आलयविज्ञानं वर्तते। चित्तस्य विशेषावस्थाग्राही एव सुखदुःखादि वर्तते, चित्तम् चैत्तविज्ञानं प्रत्यक्षं वर्तते, चित्तस्य कापि अवस्थान, यस्यां संवेदनं न स्यात् एवम् आत्मविदित्तं भवति तदेव आत्मसंवेदनं वर्तते। इदं प्रत्यक्षं, इदम् आत्मसंवेदनं ज्ञानं साक्षात्कारि अभ्रान्तं वर्तते, अत एव प्रत्यक्षम्।

**4. योगिप्रत्यक्षम्-**

**भूतार्थभावनाप्रकर्षवर्यन्तजं योगिज्ञानं चेति।**[12]

सिद्धार्थस्य भावनायाः प्रकर्षः स्फुटाभासस्य यः चर्मोत्कर्षः स्यात् तेन जायमानं ज्ञानं योगिप्रत्यक्षं वर्तते। यथार्थवस्तः भावनायाः प्रकर्षपर्यन्तेन समुद्भुतं योगिनां ज्ञानं प्रत्यक्षं वर्तते। भूत इत्यस्य अर्थःविद्यानार्थो वर्तते। प्रमाणैः निश्चितः अर्थ एव वस्तुतः विद्यमानो

वर्तते। यथा चत्वारि आर्यसत्यानि-दुःखं, दुःखसमुदायः दुःखनिरोधः, दुःख निरोधगामिनीप्रतिपदा ।

प्रमाणैः दृष्टः सद्भूतार्थः भूतार्थस्य या भावना या अर्थात् पुनः पुनश्चितेत्ते स्थापनं, तस्याः भावनायाः यः प्रकर्षः अर्थात् भव्यमानार्थैः अकारितज्ञानस्य स्फुटतारम्भः तस्यः यः प्रकर्षपर्यन्तं ज्ञानस्य सम्पूर्ण अवस्थाभिः प्राक् क्षणवर्तिस्फुटत्वं, तेन जायमान यत् पूर्णज्ञानं वर्तते, तदेव योगिप्रत्यक्षं कथ्यते। योगिप्रमाणेन सिद्धार्थस्य पुनरनुसंधानं कृत्वा तं पूर्णरूपेण ह्रदयाङ्गकरणमिति।

**संदर्भग्रन्थसंकेतः-**


1. प्रमाणवार्तिकम् 1/389, स्वमी योगीन्द्रानन्दः, चौखम्बा विद्याभवन, वाराणासी, 2005
2. प्रमाणवार्तिकम्,1/3 स्वमी योगीन्द्रानन्दः, षड्दर्शन प्रकाशन संस्थान, वाराणासी, 1991
3. प्रमाणवार्तिकम्, अलङ्कार, पृ.73, स्वमी योगीन्द्रानन्दः, षड्दर्शन प्रकाशन संस्थान, वाराणासी,1991
4. प्रमाणवार्तिकम्, अलङ्कार, पृ.124, स्वमी योगीन्द्रानन्दः, चौखम्बा विद्याभवन, वाराणासी ,2005
5. प्रमाणवार्तिकम्, अलङ्कार, पृ.123, स्वमी योगीन्द्रानन्दः, चौखम्बा विद्याभवन, वाराणासी, 2005
6. न्यायबीन्दुः, पृ.17, श्रीधर्मोत्तराचार्यः, चौखम्बा संस्कृत संस्थान, 1989
7. प्रमाणवार्तिकम्, अलङ्कार, पृ.1/15, स्वमी योगीन्द्रानन्दः, चौखम्बा विद्याभवन, वाराणासी, 1991
8. न्यायबीन्दुः, पृ.17,श्री धर्मोत्तराचार्यः, चौखम्बा संस्कृत संस्थान, 1982
9. न्यायबीन्दुः, पृ.19, श्रीधर्मोत्तराचार्यः, चौखम्बा संस्कृत संस्थान, 1982
10. न्यायबीन्दुः, पृ.20, श्रीधर्मोत्तराचार्यः, चौखम्बा संस्कृत संस्थान, 1982
11. सौगतविद्यानुशीलम्


## References

[1] सौगतविद्यानुशीलनम्, पृ.5

[2] प्रमाणवार्तिकम् 1/389, स्वमी योगीन्द्रानन्दः, चौखम्बा विद्याभवन, वाराणासी,2005

[3] तत्त्वसंग्रह, 1/3587, द्वारिकादास शास्त्री, बौद्धभारती, वाराणसी, 1997

[4] प्रमाणवार्तिकम्, 1/3 स्वमी योगीन्द्रानन्दः, षड्दर्शन प्रकाशन संस्थान, वाराणसी, 1991

[5] प्रमाणवार्तिकम्, अलङ्कार, पृ.73, स्वमी योगीन्द्रानन्दः, षड्दर्शन प्रकाशन संस्थान, वाराणासी, 1991

[6] प्रमाणवार्तिकम्, अलङ्कार, पृ.124, स्वमी योगीन्द्रानन्दः, चौखम्बा विद्याभवन, वाराणासी, 2005

[7] प्रमाणवार्तिकम्, अलङ्कार, पृ.123, स्वमी योगीन्द्रानन्दः, चौखम्बा विद्याभवन, वाराणासी, 2005

[8] न्यायबीन्दुः, पृ.17, श्रीधर्मोत्तराचार्यः, चौखम्बा संस्कृत संस्थान, 1989

[9] प्रमाणवार्तिकम्, अलङ्कार, पृ.1/15, स्वमी योगीन्द्रानन्दः, चौखम्बा विद्याभवन, वाराणासी, 1991

[10] न्यायबीन्दुः, पृ.17, श्रीधर्मोत्तराचार्यः, चौखम्बा संस्कृत संस्थान, 1982

[11] न्यायबीन्दुः, पृ.19, श्रीधर्मोत्तराचार्यः, चौखम्बा संस्कृत संस्थान, 1982

[12] न्यायबीन्दुः, पृ.20, श्रीधर्मोत्तराचार्यः, चौखम्बा संस्कृत संस्थान, 1982